१२। "तुविष्मान् वृद्धिमान् बलवान् वा" भा०। "भीमस्तुविष्मान् चर्षणिभ्यः" १।५५।१। "तुविष्मान् प्रज्ञावान् बलवान् वा" भा०। बलेन प्रज्ञया च वृद्धेः पूर्वस्य सम्भवात् बलप्रज्ञयोस्तथात्वम्।

**तुवीरवत्** त्रि० तुवी मत्वर्थीयोरः ततो मतुप् मस्य वः। बहुस्तोत्रयुक्ते। "रथा कविस्तुवीरवान्" ऋ० १०।१६४।४। "तुवीरवान् बहुस्तोत्रयुक्तो भवति। मत्वर्थीयप्रत्ययावृत्तिः। यद्वा तुविशब्दस्य रो मत्वर्थीयः। बाहुल्ययुक्तदेवैः सहितो भवति" भा०।

**तुश** वधे भ्वा० आ० सक० सेट्। तोशते अतोशिष्ट तुतुशे। "इन्दुरिन्द्राय तोशते नितोशते" ऋ० ९।१०९।२२ "इन्दुः सोम इन्द्रायेन्द्रार्थं तोशते" तोशते हन्यते अभिषूयते। नितोशते नितरामभिषूयते। तोशतिर्वधकर्म्मा" भा० कर्मकर्त्तरि तङ्। यगभावश्छान्दसः। "सत्रात्वं पुरुष्टुत एको वृत्राणि तोशसे"। ऋ० ८।१५।११। तोशसे हिनस्सि" भा०।

**तुष** तोषे आनन्दभेदे दि० प० लृदित् अक० सेट्। तुष्यति अतुषत्। तुतोष। ओदित् वर्त्तमाने क्तः तुष्टः। तुष्टिः। तोषः "तुष्य द्रौपदि! मा क्रुध" भा० व० ११०९ श्लो० "तुष्यन्ति च रमन्ति च" भा० आनु० १२७६ श्लो० "तुतोष पश्यन् वितृणान्तरालाः" भट्टिः।

**तुष** पु० तुष–क। १विभीतकवृक्षे (वयड़ा) २धान्यत्वचि स्वनामख्याते द्रव्ये च अमरः। "व्रीहीन् जिहाससि सितोत्तमतण्डुलाढ्यान् को नाम भोस्तुषकणोपहितान् हितार्थी" प्रबो० च०। "तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुलाः" हितो०। "सतुषं धान्यमुच्यते" आ०त०।

**तुषग्रह** पु० तुषेण गृह्यते ग्रह–कर्मणि अप्। वह्नौ त्रिका०

**तुषज** त्रि० तुषे जायते जन–ड। तुषजाते वह्न्यादौ। अस्य "दीर्घकाशतुषभ्राष्ट्रवटं जे" पा० आद्युदात्तता।

**तुषधान्य** न० तुषावृतं धान्यं शा०त०। तुषावृते सतुषे धान्ये। "तुषधान्यतीक्ष्णमन्त्राभिचारवेतालकर्मज्ञाः"। "परधनहरणाभिरतास्तुषधान्यं सर्वभिषजश्च"।वृ०स०१५अ०।

**तुषसार** पु० तुषं सरति अनुसरति सृ–अण्। वह्नौ शब्दमा०

**तुषानल** पु० तुषस्यानलः। तुषजाते अग्नौ। तुषाग्न्यादयोऽप्यत्र।

**तुषाम्बु** न० तुषोदकशब्दार्थे "तुषाम्बु दीपनं पाण्डुकृमिरोगगदापहम्। तीक्ष्णोष्णं पाचनं पित्तरक्तकृद्बस्तिशूलहृद्" भावप्र०।

**तुषार** पु० तोषयति तुष–अन्तर्भूतण्यर्थात् आरन् किच्च। १देशभेदे। (तुखार) शब्दे दृश्यम् तत्र तुखारा इत्यत्र तुषारा इति पाठान्तरम्। २हिमकणभेदे नीहारे हेमच०। ३शीतलस्पर्शे अमरः ४तद्वति त्रि०। "अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा" नैष० "प्रपतत् तुषारो हेमन्तकालः" ऋतुसं० ५कर्पूरभेदे राजनि०। "जनस्तुषाराञ्जनपर्वताविव" "स्नपनवारितुषारभृतस्तनाः" माघः। "आचचाम सतुषारशीकरः" रघुः। "पदं तुषारस्रुतिधौतरक्तम्" कुमा०। "लघुतुषारतुषारजलश्च्युतम्" किरा०।

**तुषारकर** पु० तुषारो हिमः करोऽस्य। १हिमकरे चन्द्रे तुषारकिरणादयोऽप्यत्र। "कलया तुषारकिरणस्य पुरः" माघः। २कर्पूरे च।

**तुषारगिरि** पु० ६त०। १हिमालये "तुषारगिरिकूटाभं सिताभ्रशिखरोपमम्" भा० अनु० १४ अ०। तुषाराचलादयोऽप्यत्र।

**तुषित** पु० तुष–बा० कितच् तुष–सम्प० क्विप् ततः तारका० इतच् वा। १गणदेवताभेदे ते च द्वादश। किन्तु मन्वन्तरभेदे भिन्ननामानः यथा "चाक्षुषस्यान्तरे पूर्वमासन् ये तुषिताः सुराः। वैवस्वतेऽन्तरे ते वै आदित्या द्वादश स्मृताः" हरिवं० ३अ०। तथा च आदित्यरूपा द्वादश१२ "प्राणापानावुदानश्च समानो व्यान एव च। चक्षुः श्रोत्रंरसाघ्राणस्पर्शे बुद्धिर्मनस्तथा। द्वादशैते तु तुषिताः देवाः स्वारोचिषेऽन्तरे" सारसुन्दरीधृतवाक्योक्ता द्वादश१२ "तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिडस्पतिः। इध्मः कविर्विभुः स्वाह्नः सुदेवो रोचनो द्विषट्१२। तुषिता नाम ते देवा आसन् स्वायम्भुवेऽन्तरे" शब्दार्थचि० धृतवाक्योक्ता द्वादश इति षट्त्रिंशत्। ये च द्वादशेति मन्यन्ते ते एकैकमन्वन्तरापेक्षया द्वादशेति वर्णयन्ति। समष्ट्यभिप्रायेण षट्त्रिंशदिति विवेकः। तदभिप्रायेणैव "षट्त्रिंशत्तुषिता मताः" इत्युक्तम्। २विष्णौ पु०। "तुषित! महातुषितेत्यादि" भा०शा०३४अ०। विष्णुस्तुतौ।

**तुषोत्थ** न० तुषादुत्तिष्ठति उद्+स्था–क ५त०। १तुषोदके राजनि०।

**तुषोदक** न० तुषमिश्रितमुदकं शा० त०। १काञ्जिकभेदे हारा०। तत्करणप्रकारो भावप्र० उक्तो यथा "तुषोदकं यवैरामैः सतुषैः शकलीकृतैः"। यवैरुदकसहितैः सन्धानवर्गोक्तत्वात्"। तुषाम्बुशब्दे तद्गुणादि दृश्यम्।